A.C. Joshi Library
P.U. Chandigarh

MSS No. २९३ Subject PHILOSOPHY

Name of MSS सामान्य लक्षण

Author

Period Folios २8

Script Sanskrit Source Prithi Pal Singh

Missing Folios

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

(13)

293

2.93

213

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

A.No. 293

सा॰ द॰
१

ॐ श्रीगुरुगणपाम्बापदपङ्कजेभ्यो नमः सामान्यधर्मज्ञानानन्तरं यावत्सामान्याश्रयप्रत्यक्षोद
यात् सामान्यलक्षणप्रत्यासत्तेः प्रत्यक्षहेतुत्वमभ्युपेयते साच ज्ञानसामान्यं सामान्यज्ञानं वा (
ज्ञानं च तदिन्द्रियजन्यग्राह्यस्मरणाभिन्नेन्द्रियादिजन्यज्ञानानन्तरं यावत्सामान्याश्रयप्रत्यक्षानु
दयात् तथा च घटत्वादिप्रकारतानिरूपितालौकिकघटादिमुख्यविशेष्यताशालिचाक्षुष
तावच्छिन्नं प्रति चाक्षुषप्रकारीभूतघटत्वादिना वा हेतुता द्रव्यत्वादिसामान्यलक्षणाजन्य
ज्ञाने व्यभिचारवारणाय घटत्वादिप्रकारतानिरूपितत्वं विशेष्यतायां निविष्टं ज्ञानांशे घटत्व
प्रकारकत्वादिनिवेशेपि घटत्वनिर्विकल्पकोत्तरोत्पन्नेसन्निकृष्टघटांशे घटत्वप्रकारकयावद्द्रव्यप्र
त्यक्षे द्रव्यत्वसामान्यलक्षणाजन्ये व्यभिचारः स्यात तत्तदुपेक्षितं नच घटत्वविशेषणज्ञान राम
१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

1A

ज्ञानविशेष्यभासकसामग्रीसत्वेनासन्निकृष्टघटांशेघटत्वाभावेपिबाधकाभावात् ता
दृशज्ञानस्यघटत्वप्रकारतानिरूपितलौकिकान्यमुख्यविशेष्यताशालित्वेनयथोक्तधर्म
कार्यतावच्छेदकत्वेपितत्रव्यभिचारोदुर्वारइतिवाच्यं घटत्वसामान्यलक्षणारूपकारणविर
हेणैवतत्रासन्निकृष्टघटेघटत्वप्रकारकत्वाभावासंभवात् नचघटत्वसामान्यलक्षणांवि
नापितत्तद्घटेघटत्वप्रकारकतद्बुद्धेर्विशेषणज्ञानादिनाजननात् तत्कुलात्ततद्घटांशेघटत्वप्र
कारकज्ञानापत्तौघटत्वसामान्यलक्षणाविरहःकिंचित्करइतिवाच्यं घटत्वसामान्यलक्ष
णामंतत्तद्घटज्ञानात्मकज्ञानप्रत्यासत्तितत्तद्घटलौकिकसन्निकर्षान्यतमविशेषणसामग्रीस

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सा॰२

२

हकत्वविशेषणताज्ञानादीनामेवतत्तद्घटांशेघटत्वप्रकारकप्रत्यक्षजनकत्वात् यथोक्तस्य
लैक्ताहृशविशेषसामग्रीविरहेणापादनासंभवात् जातित्वादिनाघटत्वविशेष्यकस्मरणा
नंतरंद्रव्यत्वप्रकारकघटादिविशेष्यकचाक्षुषं तत्रतदुत्तरोत्पन्नयावद्द्रव्यप्रत्यक्षेघटत्वस्य
प्रकारतयाभानमेवनेष्यतइतिनकाचिदनुपपत्तिः लौकिकान्यत्वस्यविशेष्यतायांनिवे
शान्निर्विकल्पकाद्युत्तरोत्पन्नलौकिकप्रत्यक्षेनव्यभिचारः नचसामान्यलक्षणाजन्य
ज्ञानस्ययावद्घटविषयकत्वनिर्वाहाययावद्घटविशेष्यकत्वस्यावश्यकार्यतावच्छेदक एम
२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

2A

कोटिप्रवेशेन लौकिकसन्निकर्षजन्यप्रत्यक्षस्य च यावद्दृष्टविषयकत्वेनैव न तत्र
व्यभिचारः संभवति किं लौकिकान्यत्वनिवेशेन इति वाच्यं यावद्दृष्टविशेष्यकत्वस्य
निवेशेपि बाधकविरहेणैव यावद्दृष्टभानोपपत्तौ तन्निवेशप्रयोजनविरहात् व्यभि
चारवारणाय तदपेक्षया लाघवात् लौकिकान्यत्वस्यैव निवेशयितुमुचितत्वात्
तत्तद्घटादिरूपसामान्यलक्षणास्थले यावदाश्रयविषयविषयकलौकिकस्यापि ।
लौकिकेन यावदाश्रयविषयकत्वनिवेशेपि व्यभिचारवारणासंभवाच्च मुख्यत्व

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मा॰ २ निवेशाद्घटत्वादिस्मरणादिजन्यघटोपनीतभानाद्दोन व्यभिचारः वहिरिं
द्रियजन्योपनीतभावेन उपनीतस्यविशेषणतयैवभावात् मुख्यत्वं चप्र
3 कारतान्यत्वं घटत्वादिविषयकनिर्विकल्पकानंतरं यावद्घटप्रत्यक्षानुद
यात् कारणतावच्छेदककोटौप्रकारत्वनिवेशः एकसंबंधेनसामान्यप्रका
रकज्ञानात्संबंधांतरेणसामान्याश्रयप्रत्यक्षापत्तिवारणाय तत्संबंधेनसा
मान्याश्रयप्रत्यक्षहेतुतायांतत्संबंधावच्छिन्नप्रकारतैव निवेशनीया। शुभम्

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

3A इत्थं च सामान्यभेदेनैव संबंधभेदेनापि कारणताभेदो बोध्यः तत्र च प्रथम
कल्पे कारणतावच्छेदकप्रत्यासत्तिः समवायादिः कार्यतावच्छेदकप्रत्यास
त्तिश्च विषयता न च विषयतासंबंधेन समूहालंबनरूपघटत्वप्रकारक
ज्ञानस्य पटादावप्युत्पत्तेः तत्र च घटत्वाभावाद्व्यभिचार इति वाच्यं घटादिवृ
त्तिविषयतात्वेनैव संबंधत्वाभ्युपगमात् एकपुरुषीयसामान्यज्ञानात्पुरु
षांतरीयसामान्याश्रयप्रत्यक्षवारणाय ज्ञानांशे तत्तत्पुरुषीयत्वं निवेश्यं

सा·
४
5

इत्थंचगुरुत्वभेदेनापिकारणताभेदः चरमकल्पेचकार्य्यस्यकारणस्यचस-
मवायएवप्रत्यासत्तिः अतोनैकपुरुषीयज्ञानादन्यदीयसामान्याश्रयप्रत
त्वप्रत्यक्षप्रसंगः अतएवपूर्वकल्पापेक्षयालाघवम् एतत्कल्पेगुरुत्वभेदेनकार-
णताभेदाभावात् नचयद्यद्विषयकप्रत्यक्षंतत्तत्प्रत्यासन्नकारणजन्यमितिनिय
मानुरोधेनज्ञानप्रत्यासत्तिमतेपिस्वविषयीभूतघटत्वादिमत्त्वरूपविषयनिष्ठप्रत्या
सत्तैवहेतुतावाच्या इत्यत्रनन्मतेतत्पुरुषीयत्वनिवेशआवश्यकइतिवाच्यं गुरु

५A एकत्वस्यानियमेमानाभावात् भावेवाविषयतासंबंधेनप्रत्यक्षंप्रतिविषय
यतासंबंधेनेश्वरीयत्वेनसाधारणत्वान्नत्वेनेकहेतुताकल्पनात् सामा
न्यलक्षणायाअनंतपुरुषभेदेनानंतकारणत्वकल्पनापेक्षयाएकहेतुता
कल्पनायाएवन्याय्यत्वात् नचात्मनिष्ठप्रत्यासत्तिमतेएकसामान्यज्ञाना
दपरसामान्याश्रयप्रत्यक्षवारणायसामान्यानांविशिष्यनिवेशस्याधिक
तयागौरवं मन्यतेतु लौकिकान्यसत्त्वविशेष्यतासंबंधेनचाक्षुषत्वावच्छि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सा॰ त्वंप्रतिप्रकारतासंवंधेनचाक्षुषादिमत्त्वेन।केद्देहताकल्पनेनैवोपपत्तेः।
५ नसामान्यभेदेनकारणताभेदः पुरुषापेक्षयाचपुरुषाणांवहुतरतयापुरु
5 षभेदेनकारणताभेदकल्पनापेक्षयासामान्यभेदेनकारणताभेदकल्पनेगौ
रवमितिवाच्यम् सामान्यधर्माणांविशिष्यानिवेशेद्रव्यत्वप्रकारकचाक्षुषा
दिकालेघटत्वादिनिर्विकल्पकसत्वेनतदुत्तरंद्रव्यत्वभावप्रतिवन्धकीभूतदो राम
षादिसत्वेघटत्वादिनायावद्दृष्टभानापत्तेः प्रकारतासंवंधेनचाक्षुषादिम ५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

5A नोद्रव्यत्वादेरेवयावद्घटसत्वात् नचेष्टापत्तिः सामान्यप्रकारकज्ञानस्यै
वसामान्यलक्षणयाजननात् द्रव्यत्वप्रकारकज्ञानस्यद्रव्यत्वसामान्यल
क्षणयाप्रजननात् ज्ञायमानसामान्यप्रत्यासत्तिकल्पेपिस्वप्रकारक
चाक्षुषादिसमवायित्वरूपात्मनिष्ठप्रत्यासत्त्यैवसामान्यस्यहेतुताकल्पनी
येतिलघुरूपभेदेनकारणतावाहुल्यमितिचेत् एवमपिघटत्वादिरूपेणैव
सामान्यहेतुतायावाच्यतयाघटेतरावृत्तित्वविशिष्टयावद्घटवृत्तित्वरूप

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सा॰ ६

त्वा

घटत्वादिनिवेशप्रयुक्तगौरवस्याशक्यपरिहारत्वात् मन्मते स्वरूपत एव घट

त्वनिवेशात् न च घटत्वादीनामाधेयतासंबंधेन घटत्वत्वादिनैव हेतुताकल्प

6 ते ननु घटत्वादिनेति वाच्यं तथा सति द्रव्यत्वत्वादीनामपि तादृशाकारणतावच्

छेदकात्वेन तथा च तत्प्रकारकत्वानुभवात्तज्ज्ञानप्रतिबंधकदशायां घटत्वप्रकारक

त्वानुपपत्तेः न चैवमपि घटादिसामान्यलक्षणस्थले स्वरूपतो घटत्वा

दीनामेव कारणतावच्छेदकतया कारणतावच्छेदकतया गौरवात् । रा॰म॰ ६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

6A नच सामान्ये हेतुतायां बाधकाभाव इति वाच्यं घटनाशदशायामपि तदा
श्रयप्रत्यक्षोदयात् तत्रापि परम्परासंबंधेन घटत्वादीनामेव प्रत्यासन्नितायाः
भवतो वाच्यत्वात् वस्तुतस्तु सामान्यज्ञानप्रत्यासन्नितामते लौकिकान्यमु
ख्यविशेष्यतानिरूपितप्रकारतासंबंधेन चाक्षुषत्वाद्यवच्छिन्नं प्रति प्रकार
तासंबंधेन चाक्षुषत्वादिना हेतुता कल्प्यते अतो न सामान्यभेदेन हेतुता
भेदः नच मन्मतेपि तादृशसंबंधेन चाक्षुषत्वाद्यवच्छिन्नं प्रति प्रका

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सा०
७
7

रतासंबंधेनचाक्षुषत्वादिनानातादात्म्यसंबंधेनहेतुताकल्पनइतिनसा
मान्यभेदेनहेतुताभेदः इतिनलाघवावकाशः इतिवाच्यम् एवमपि
चाक्षुषत्वजातेरवच्छेदकत्वापेक्षया चाक्षुषत्वेनानंतचाक्षुषाणांन
यात्वेगौरवात् वस्तुतस्तुपरम्परासंबंधेनघटत्वप्रकारकज्ञानविरह
दशायामपि साक्षात्सम्बन्धेनघटादिप्रकारकज्ञानात् तदो
श्रयस्तानोदयात् तत्रचानायत्याघटादेरेवप्रकारतयाभावात्तस्या राम
७

7A

तीतत्वदशोसन्ननतादृशज्ञानेव्यभिचारात्सामान्यज्ञानमेवप्रत्यासत्तिः अ
थकार्य्यतावछेदकसंबंधेनकार्य्याधिकरणेनद्व्यवहितप्राक्क्षणावछेदेनका
रणतावछेदकसंबंधावछिन्नप्रतियोगिताकाभाववत्वमेवव्यभिचारः अत्रच
तादृशप्रकारकत्वकार्यतावछेदकसंबंधेनतादृशप्रत्यक्षाधिकरणीभूतातीत
घटादौतादृशप्रत्यक्षाव्यवहितपूर्वक्षणावछेदकविरोधात् नचयत्कालाव
छेदेनयत्रप्रतियोगितावछेदकंनवर्त्तते तत्कालावछेदेनतत्रतद्धेदोवर्त्तते

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सा॰
८
8

प्रकृते चाऽतीतघटादावेतत्कालावच्छेदेन चाक्षुषवत्त्वं नास्तीति एतत्काला
वच्छेदेन तद्भेदो वर्त्तत एवेति वाच्यम् । एतत्कालस्यावच्छेद्य चाक्षुषवत्त्वाधिकर
णीभूतघटानधिकरणतया तदवच्छेदकत्वासंभवात्तादृशभेदस्याप्यवच्छेदकत्वा
संभवादिति न व्यभिचारसंभव इति चेन्न । एवमपि अतीतघटादौ कार्य्याव्यवहि
तपूर्ववर्त्तित्वावच्छेदेन सामान्यसत्त्वात् नत्वप्रकारतासंबंधेन प्रत्यक्षोत्पादासंभ
वः । न च भवन्मतेपि एतत्कालस्यातीतघटनिष्ठप्रकारतासंबंधावच्छिन्नसत्ता

राम
८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

8A

नरूपकारणाधिकरणतानवच्छेदकतयाकथंतदानींतत्प्रकारतासंवंधेनका
र्य्यमुत्पद्यत इति वाच्यं विषयतासंवंधावच्छिन्नाधिकरणतया अधिकरणसं
वंधकालस्याप्यवच्छेदकत्वात् अन्यथा ज्ञानेच्छादीनां विषयनिष्ठप्रत्यासत्त्या
कार्य्यकारणभावविलयप्रसंगात् अथवा प्रकृतस्थले अवच्छेदकत्वमनंत
र्भाव्य यत्र देशे यत्क्षणाव्यवहितपूर्वक्षणावृत्ति चाक्षुषादिरूपं कारणं वर्त्तते न
त्र तत्क्षणे चाक्षुषादिरूपं कार्य्यप्रकारतासंवंधेन उत्पद्यते एवं सामग्र्यां

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सा॰
ध्
१

न्निरूप्यतेइत्यतोनानुपपत्तिः भवन्मते च एतत्कालवृत्तिसामान्यस्य तादात्म्यसं
बंधेनातीतघटादावसत्वात् ईदृशाव्याप्त्यभ्युपगमेपि न निस्तारः अथ विनश्यद
वस्थसन्निकर्षजन्यप्रकारकत्वाद्दुष्टात्घनंतरं सामान्यप्रत्यासत्तिजन्यत्वाद्दुष्टा
व्याप्तिः स्वाश्रयविशेष्यतानिरूपितसामान्यप्रकारतासंबंधेन चक्षुःसंयोग
विशिष्टत्वाद्दुष्टत्वादिनाऽऽत्मनिष्ठप्रत्यासत्त्या स्वाश्रयविशेष्यतानिरूपितत्वसं
बंधेन चक्षुःसंयोगविशिष्टप्रकारतात्मकविषयनिष्ठप्रत्यासत्त्याव्याप्त्यादुष्टत्वा राम ध्

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

9A दिनाहेतुत्वेपि धूलीपटलादिविशेष्यकधूमत्वादिप्रकारकभ्रमोदोषबलात्
यत्रोत्पन्नस्तत्रतदुत्तरं यावद्धूमप्रत्यक्षापत्तिः आत्मनिष्ठप्रत्यासत्तिकल्पनेतत्सा
मान्याश्रयीभूततत्त्वाश्रयविशेष्यतानिरूपिततत्सामान्यप्रकारताकत्वसंबंधेन
चक्षुस्संयोगादिविशिष्टचाक्षुषत्वादिना विषयनिष्ठप्रत्यासत्तिकल्पनेतु स्वसमा
नाधिकरणवृत्तित्वस्वाश्रयविशेष्यतानिरूपितत्वैतदुभयसंबंधेनचक्षुस्संयोग
विशिष्टप्रकारतासंबंधेनचाक्षुषत्वादिनाहेतुत्वकल्पनेतु धूलीपटलादिवि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सा॰
१०

10

शेष्यकधर्मत्वादिप्रकारकभ्रमदोषादिसत्वकालेयावद्धर्मत्वाश्रयप्रत्यक्षानुद
यप्रसंगः तत्रदोषादिवैशिष्ट्यंनिवेश्यहेतुत्वकल्पनेपिव्यभिचारवारणमशक्य
मेवेतिचेन्न सामान्यलक्षणाप्रत्यासत्त्यासामान्यप्रकारतानिरूपितलौकिक
विषयताभ्यन्नचाक्षुषादीनांकृत्याप्यजननान् तादृशविशिष्यताशालिचाक्षुष
सामग्रीसहकारेणैवसामान्यप्रत्यासत्तेःफलजनकत्वाभ्युपगमेनोपदर्शितता
पत्त्यऽसम्भवात् विवेचनीयंचेदमधिकमग्रेमधिकमप्रिमयेच यत्रएक

साम
१०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

10A घटे विनश्यदवस्थसन्निकर्षात् घटत्वचाक्षुषं अपरत्र चक्षुःसंयोगोत्पादः तत्र
यावद्घटप्रत्यक्षापत्तिः घटत्वप्रकारतानिरूपितलौकिकविषयताशालिचाक्षु
सामग्रीसत्वात् इति वाच्यम् इष्टत्वात् मानसस्थले सामान्यप्रकारकज्ञा-
नत्वेनैव हेतुतास्मरणादितोपि मानसप्रत्यक्षोदयात् कार्यतावच्छेदके च ताद्
शज्ञानाव्यवहितोत्तरमानसत्वम् अव्यवहितोत्तरत्वनिवेशात् घटत्वादिविशे-
ष्यकसंबंधांतरेण तत्प्रकारकज्ञानाद्यत्र घट इत्याकारकोपनीतभानं तत्रैव व्या

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सा॰
११

भिचारः मानसमुख्यविशेष्यतयापिभानात् मुख्यविशेष्यतामनिवेश्यव्यभि
चारवारणमशक्यमितिध्येयम् मानसस्थलेचसामान्यप्रकारकलौकिकसाम
ग्रीकापेक्षिता घटत्वादिप्रकारकलौकिकसामग्रीकालेमानसस्यैवानुदयादि
ति नव्यास्तु स्मरणसाधारणसामान्यविषयकज्ञानत्वेनैवहेतुता सामान्यप्र
कारकप्रत्यक्षत्वेन कार्यता स्मरणादिकालेपि सामान्याश्रयप्रत्यक्षमिष्टमेव
सामान्यप्रत्यासत्तिजन्यचाक्षुषादौ सामान्यप्रकारकलौकिकचाक्षुषसाम

राम
११

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

11A

ग्याज्ञावश्यकत्वात् द्वितीयक्षणे सामान्यप्रकारकत्वात्तु बोधसत्वात् तृतीयक्ष-
णे यावत्सामान्याश्रयप्रत्यक्षस्य भवतोप्यावश्यकत्वात् द्वितीयक्षणे तदुत्पादा-
भ्युपगमे क्षतिविरहात् अन्यथा इंद्रियभेदेन कारणताबाहुल्यप्रसंगात् एवं
च निर्विकल्पकोत्तरमपि यावत्सामान्याश्रयप्रत्यक्षमिष्टमेव द्वितीयक्षणे विशिष्टबु-
द्ध्युत्पत्त्या तृतीयक्षणे तदुत्पादस्यावश्यकत्वात् न च सामान्यप्रकारकत्वापे-
क्षया सामान्यविषयकत्वस्यालघुतया निर्विकल्पक द्वितीयक्षणे इष्टापत्तिरस्तु

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सा॰
१२
12

चिना परं तु विषयतात्वेन प्रकारताविशेष्यतादीनामेवावच्छेदकत्वापेक्षया प्र-
कारतात्वेन प्रकारतामात्रस्यैव तथात्वमुचितमिति वाच्यं सामान्यप्रकारका-
मात्रस्यैव ज्ञानस्य हेतुत्वे निर्विकल्पकोत्तरकालीनसामान्यप्रकारकलौ-
किकप्रत्यक्षे सामान्यविशेष्यकज्ञानजन्योपनीतभाने च व्यभिचारवार-
णाय लौकिकान्यमुख्यविशेष्यतानिवेशस्याऽऽवश्यकतया गौरवात् राम
न निवेशोऽपि सामान्यविशेष्यकज्ञानजन्ये सामग्री प्रकारता- १२

12A निरूपितलौकिकान्यमुख्यविशेष्यताशालिमानसोपनीतभानेव्यभिचारप्रसं
गाच्च तद्वारणाय व्यवहितोत्तरत्वस्य निवेशे च महागौरवात् नच एकसंबंधेन
सामान्यप्रकारकज्ञानात्संबंधांतरेण सामान्याश्रयप्रत्यक्षवारणाय तत्संबंधेन
सामान्याश्रयप्रत्यक्षे तत्संबंधेन सामान्यप्रकारताशालिज्ञानत्वेन हेतुताकल्पना
स्यावश्यकत्वात् कथं निर्विकल्पकसाधारण्यमिति वाच्यं एकसंबंधेन सामान्यप्रका
रकज्ञानादपि संबंधांतरेण सामान्याश्रयप्रत्यक्षस्येष्टत्वात् यदि पुनस्तादृशफल

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सा॰ १३ मनुभवविरुद्धमितिमन्यते तदासंबंधांतरेणसामान्यप्रकारकज्ञानादपित
त्सत्वेन संबंधांतराविशेषान्निर्विषयनिर्विकल्पकव्यावृत्तरूपेण जनकतावा(
13 च्या संबंधांतरेणसामान्यप्रकारकज्ञानजन्ये संबंधांतरेणसामान्यप्रकार
कसामान्याश्रयमुख्यविशेष्यकमानसोपनीतभाने चव्यभिचारवारणायतन
त्तन्मानसभेदकूटस्यकारणत्वमवहितोत्तरत्वस्यवाकार्यतावच्छेदककोटौ निवे
शनमप्यावश्यकमितिध्येयं अत्रवदंति निर्विकल्पकसाधारणसामान्यज्ञानस्य राम १३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

13A प्रत्यासत्तित्वमनेनज्ञानप्रत्यासत्त्याहि हेतुत्वेमानाभावः घटोनास्तिसुरभिचंदनं।
मित्यादौघटसौरभादीनांघटत्वसौरभत्वसामान्यलक्षणाप्रत्यासत्तिबलादेवभा
नोपपत्तेः नचसामान्यप्रत्यासत्त्याफलजननेकिंचिदंशेसामान्यप्रकारक
ज्ञानसामग्र्यंतरस्यापेक्षितत्वादुपदर्शितस्थलेचघटाद्यंशेघटत्वप्रकारकज्ञा।
नसामग्र्यंतरविरहेणाकथंघटत्वादिसामान्यलक्षणयाघटादिभानंजननीय
मितिवाच्यं तत्रघटादिज्ञानघटितोपनीतभानसामग्र्याएवसत्वात् नचैता

सा॰ १४ 14

नप्रत्यासत्तेरहेतुत्वे कथं घटादिज्ञानस्यसामग्रीघटकत्वमितिवाच्यं घटादि
ज्ञानस्यापिघटादिप्रकारकप्रत्यक्षत्वेसामान्यज्ञानविधयैवहेतुत्वसंभवात् ।
ज्ञानलक्षणायाः प्रत्यक्षकारणतायामेवविवादात् नचसामान्यलक्षणावि
धयारूढप्रकारणताकघटादिज्ञानघटितसामग्र्याः सामग्र्यन्तरत्वाभाव
इतिवाच्यं सामग्र्यन्तरपदेनप्रकृतसामान्यप्रत्यासत्त्यतिरिक्तसामग्र्याएव
विवक्षितत्वात् घटादिज्ञानस्यापिघटत्वादिसामान्यलक्षणातिरिक्ततया राम १४

15A सामग्र्यन्तरस्योपपत्तेः नचतत्रघटत्वसौरभत्वसामान्यलक्षणप्रत्यासत्तिजन्यतावच्छे
दककोटावपिघटत्वसौरभत्वादिविषयितानिवेशात्तादृशसामान्यलक्षणादेवतज्ज्ञानस्या
प्युपपत्तेः यत्तुरजतत्वादिनाशुक्त्याद्युपनीतभानानुरोधेनज्ञानलक्षणप्रत्यासत्ते
ज्ञाः पृथक्कारणत्वकल्पनमावश्यकमितिवाच्यं तत्रशुक्तिवृत्तिधर्मस्यानाभा
वेनसामान्यलक्षणातस्तदनिर्वाहादिति तदपिन रजतत्वसामान्यलक्षणावला
देवतत्रशुक्तिभानोपपत्तेः नचरजतत्वसामान्यलक्षणायारजतत्वाश्रयप्रत्यक्षं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सा॰ १५

15 प्रत्येवहेतुतयाकथंनहुलाद्रजतत्वानाश्रयशुक्तिभानमितिवाच्यं शुक्तेरपिका
लिकादिसंबंधेनरजतत्वाश्रयत्वात् वस्तुतोदोषादिरूपकारणबलादेवतत्रशुक्ति
भानमितिवाच्यंनतदनुरोधेनज्ञानंप्रतिहेतुतायाआवश्यकत्वं नचरजतज्ञानका
पि॰८ लेशुक्तेरभानेदोषादिबलाज्ञाद्दशोपनीतभानापत्तिरितिवाच्यं दोषस्यफलबल
कल्प्यतयातत्रफलाभावेनदोषस्यैवाकल्पनात् अथज्ञानलक्षणायांघटम्
हेतुत्वेकेनचिद्रूपेणघटत्वविशिष्टकज्ञानदशायांघटज्ञानाद्यसत्वेघटादिनाघ राम १५

15A

टादिमुख्यविशेष्यकमानसोपनीतभानापत्तिः न च तदानीं सामान्यलक्षणयैव
घटादिमानसजननाद्घटादिमानसमिष्टमेवेति वाच्यं घटत्वादिसामान्यलक्षणया
किंचिद्विशेषघटत्वादिप्रकारकज्ञानसामग्र्या एव सहकारेणैव फलजननात् न
चैतादृशसामग्रीभावेन तद्याघटादिघटत्वादिज्ञानजननात्तत्तद्घटादिमानस
स्यानिष्टत्वादिति चेत् एवमपि लौकिकान्यतद्विषयताशालिज्ञानत्वावच्छिन्नं प्र
तिनद्विषयकज्ञानत्वेनैव हेतुताकल्पनेनैवोपपत्तौ ज्ञानप्रत्यासत्तिसामान्यप्रत्या

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सा॰
१६
16

सम्बन्धः पृथक्कारणत्वे मानाभावः नच सामान्यप्रत्यासत्तिजन्यसामान्याश्रयप्रत्यक्षे
व्यभिचारादेतादृशकारणत्वं न संभवतीति वाच्यं कारणाव्यवहितोत्तरत्वं कार्यताव
च्छेदककोटौ निविश्य व्यभिचारस्य वारणीयत्वात् भवन्मते ऽनुपनीतभानज्ञानप्र
त्यासत्त्या एतादृशरूपेणैव कार्यकारणभावस्य कल्पनीयतया उक्तव्यभिचारवार
णाय एतादृशरीत्यैवानुसरणीयत्वात् नचादृष्टत्वांशे लौकिकयावदृष्टज्ञानस्य लौकि
कान्यविषयतायाः लौकिकविषयतायाः सत्त्वादेतादृशज्ञानस्यापि एतादृशकार्यता राम १६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

16A वच्छेदकाकोंनत्वात् वस्तुतो व्यवहितोत्तरत्वनिवेशेनैव लौकिकज्ञाने व्यभिचारवा
रणस्यासंभवात् लौकिकान्यत्वनिवेशाद् इति न तत्साधारण्यानुपपत्तिः न च यदि
षयकत्वं तत्तद्विषयकज्ञानत्वेन हेतुमात्रकल्पने सामान्यलक्षणाजन्यज्ञाने ता
न व्यक्तीनां च विषयत्वमनुपपन्नं सामान्यज्ञानजन्यतावच्छेदककोटौ तद्विष
यत्वानिवेशात् अतः सामान्यारूपविषयतां कार्य्यतावच्छेदककोटौ निवेश्य सा
मान्यज्ञानस्य हेतुत्वान्तरकल्पनमावश्यकमिति वाच्यं सामान्यज्ञानजन्य

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सा॰
१८

।ग।

तावच्छेदककोटौ सामान्याश्रयविषयताया अनिवेशेपि तत्तद्विषयकप्रत्यक्षेच्छा
विरहविशिष्टविरोधिसामान्याभावजन्यतावच्छेदककोटौ तत्सामान्याश्रयविष
यतानिवेशात्तत्तद्बलादेव प्रत्यासत्तिरजन्यज्ञानस्य निखिलसामान्याश्रयविष
यकत्वोपपत्तिः नचैवं सामान्यज्ञानशून्यकालेपि तादृशकारणबलादेव
सामान्याश्रयप्रत्यक्षत्वापत्तिरिति वाच्यं तज्जन्यफलस्य सामान्यज्ञानजन्यता
वच्छेदकाक्रांततया सामान्यज्ञानं विना तदापत्त्यसंभवात् इति कृतं विस्तरेण स्म
१८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

17A तत्तद्विषयकप्रत्यक्षस्य तत्तद्विषयकप्रत्यक्षत्वावच्छिन्ने हेतुत्वमन्यत्वविषयतानुरोधेन प्र-
त्यक्षं प्रति विषयतासंबंधेनेश्वरज्ञानं हेतुतया अविषयकल्पनीयत्वात् सैवा-
सामान्यप्रत्यासत्तिहेतुता लौकिकान्यतद्विषयताशालिप्रत्यक्षं प्रति यत्तद्विषय-
कज्ञानत्वेन हेतुत्वेन देवदत्तज्ञानत्वेनाहेतुत्वं नित्यलौकिकप्रत्यासत्तेश्च विषयम
व्याहतमिति केचित् यदि च तत्तत्सत्त्वविषयतायाः कारणतावच्छेदकतता
संबंधेन सन्निकर्षाश्रयनियतत्वं सामान्यलौकिकज्ञानप्रत्यासत्तिसामान्यप्रत्याम

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सा॰
१८
18

न्योः कार्यकारणभावकल्पनेप्यगावश्यकं तथाहि एतन्मते सामान्यल
क्षणया स्वविषयीभूततत्तत्साध्यवत्त्वप्रत्यासत्त्या ज्ञानत्वेन तत्सामान्याश्र
यवत्तिविषयतया प्रत्यक्षत्वावच्छिन्नं प्रति हेतुता कल्पनीया एवं च घटो नास्ति सुर
भिचंदनमित्यादौ घटत्वसौरभत्ववह्नित्वधर्मतानाभावेनोपदर्शितकारणतावच्छे
दकप्रत्यातत्रसामान्यलक्षणायाऽभावात् तज्ज्ञानोपपत्तेर्लौकिकान्यविषयता
प्रत्यासत्त्या प्रत्यक्षत्वावच्छिन्नं प्रति विषयताश्रा नत्वेन ज्ञानलक्षणप्रत्यासत्तेः

राम
१८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

18A हेतुत्वांतरकल्पनमावश्यकम् अथ निर्विकल्पकसाधारणप्रत्यासत्तिमतेउ
पदर्शितविषयनियमप्रत्यासत्त्यासामान्यलक्षणायाहेतुत्वेपितत्स्वरूपोपत्वेनि
वेश्यते नतुरूपस्य घटत्वज्ञानजन्यकौत्वे समवायप्रत्यासत्त्यारूपेहेतुताका।
स्यविशेषणज्ञानस्य नियमतः सत्वात् नतएवघटत्वसौरभत्वादीनां ज्ञानवत्तात्स्य
ते तर्किं तदनुरोधेन ज्ञानप्रत्यासत्तिहेतुत्वकल्पनया नचउपदर्शितस्थलेघट।
त्वादिभाने नसामान्यलक्षणाप्रत्यासत्तिनउत्पद्यते सामान्यधर्मप्रकारकत्व

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सा॰ १९ 19

स्यसामान्यलक्षणाप्रत्यासत्तिजन्यतावच्छेदककोटिनिविष्टतयातादृशबोध
स्य च घटत्वादिवृत्तिसामान्यधर्मप्रकारकत्वेनतादृशसामान्यज्ञानजन्यता
वच्छेदकानाक्रांतत्वात् इति वाच्यं सामान्यज्ञानहेतुतायांतत्प्रकारकीयत्वाऽ
निवेशेव्यभिचारविरहेणसामान्यप्रकारकत्वस्यजन्यतावच्छेदककुक्षिनिवेश
प्रयोजनाभावात् मैवं सामान्यलक्षणायाफलजननेनत्सामान्यप्रकारक।
प्रत्यक्षजनकसामग्र्यंतरस्यसहकारित्वाभ्युपगमात् उपदर्शितस्थलेचघ राम १९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

19A

टत्वादिवृत्तिसामान्यप्रकारकप्रत्यक्षजनकसामग्रीविरहेण घटत्वादिभानेन
सामान्यलक्षणायोपपद्यते अतो ज्ञानलक्षणायाः स्वप्रकारकत्वमावश्यक
मेव एवं घटाद्युपनीतस्थितिदशायामिव तच्छून्यकालेपि घटत्वादिविशे-
ष्यकज्ञानात् घटत्वादिना घटमुख्यविशेष्यकं ज्ञानलक्षणायाः स्वप्रकारका
रणत्वाकल्पनेस्यादिति तदावश्यकमिति ध्येयम् यत्तु उपदर्शितनियमानुरोधेन
विषयतायाः प्रत्यक्षत्वावच्छिन्नं प्रति स्वविषयप्रत्यक्षत्ववत्वसंबंधेन चेश्वरसा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सा॰
२०

20

रणेपि ज्ञानत्वेनैकमेव हेतुत्वं ज्ञानलक्षणायाः कल्प्यते ननु सामान्यभेदेन भिन्नमि
ति घटत्ववज्ज्ञानं दर्शायां तद्वनाश्रयधर्मिज्ञानापत्तिस्तु न विचारसहा स्वव्यक्तिधर्मिका
देणतादृशधर्मिज्ञानस्य तादृशधर्मात्मकविशेषणज्ञानविरहेण घटत्वादिना तज्ज्ञान
स्य चेदोषविरहेणापादयितुमशक्यत्वात् सति चदोषे घटत्वादिना तज्ज्ञानस्येष्टत्वात्
इति तदसत् उपदर्शितकार्यकारणभावकल्पने घटत्वाद्यात्मकविशेषणासं
हकृतस्यैव ज्ञानसामान्यस्य फलव्याप्यत्वं स्वीकरणीयम् एकेनैव विशेषण

राम
२०

20A ज्ञानसहकारेणैव तस्य घटादेप्रत्यक्षजननात् एवं च यत्किंचित्सामान्यज्ञा
नदशायां प्रमेयमात्रे विषयतासंबंधेन प्रत्यक्षसामान्यापत्तिर्ईश्वराएव विशेष्य
हेतुत्वे च तत्सामान्यज्ञानाभावात् तदनाश्रयज्ञानापत्तिः स्वविषयतत्सामान्याश्रय
प्रत्यासत्त्या तादृशानाश्रयपसत्वात् नच सामान्यभेदेन हेतुताभेदेपि ईश्वरस्य
प्रमेयत्वादिसामान्यज्ञानस्य व्यतिरेकि यत्किंचित्सामान्यज्ञानवतः पुंसो विश्ववि
षयकप्रत्यक्षतापत्तिरिति वाच्यं प्रमेयत्वादिसामान्यलक्षणया फलजनने प्रमेयत्वा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मा॰ २१ 21 दिक्रूपविशेषणज्ञानस्यैव सहकारित्वात् तादृशविशेषणज्ञानमितिसामान्यज्ञान
विरहेणोपदर्शितापत्तेरसंभवात् घटत्वादिनायत्किंचिद्धर्मिभासकलौकिकस(
न्निकर्षादिशून्यकाले घटत्वादिसामान्यलक्षणाजन्यप्रत्यक्षानुदयात् तत्सामान्यध
र्मप्रकारेणयत्किंचिद्धर्मिविषयकप्रत्यक्षजनकसामग्र्यंतरस्य सामान्यलक्षणास
हकारेणास्वीकरणीयं सामान्यांतरं च लौकिकप्रत्यक्षसामग्र्युपनीतभा
नसामग्री च तयोश्च प्रत्येकसहकारिताबोधक सामान्यप्रत्यासत्तिजन्यज्ञाने। राम २१

21A

ताहृशसामग्र्यन्तरस्य पृथक्कारणत्वमिति तु भ्रमेण न कार्य्यः लौकिकसन्निकर्ष
जन्यतावच्छेदकधर्मस्य सामान्यप्रत्यासत्तिजन्यज्ञानसाधारणतया तत्तस्य लक्ष
म्रहेतुतयैवोपपत्तेः नहि स्वतंत्रहेतुताकल्पने कुत्रचिद्दापत्तिः संभवति न
यादि नद्धर्मावच्छिन्नयत्किंचिद्व्यक्तिनिष्ठकार्य्यतानिरूपितकारणतावच्छेद
कीभूता यावन्तो धर्माः प्रत्येकतदवच्छिन्नत्तोमात्मिका सामग्र्यवतद्धर्माव
च्छिन्नोत्पादिका घटत्वाश्रयस्य कस्यचिल्लौकिकसामग्र्युपनीतसाम

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सा॰
२२

22

[illegible]रसत्त्वोक्ष्य नाद स्यसाम ग्येव नास्ति यतो घटत्वादिप्रकारकप्रत्यक्षत्वा
वच्छिन्नं द्विविधमेव घटत्वादिप्रकारतानिरूपितलौकिकविषयताशालिघ
टत्वादिनोपनीतयत्किंचिद्धर्मिविषयकं च तत्र यत्किंचिदंशेनेन प्रथम।
स्योपादानेन तन्निष्ठकार्यतानिरूपितकारणतावच्छेदकावच्छिन्नलौकिकसन्नि
कर्षादेरन्यस्य चोपादानेन तन्निष्ठकार्यतानिरूपितकारणतावच्छेदकावच्छेदकाव
च्छिन्नोपनायकत्वानादेरभावेन तत्रैत्तामाभावइति न काचिदनुपपत्तिः अयघटो॑ राम २२ नास्ति।
नह्युदितवतागृश।

22A घटभिन्नं नमित्यादौ यावंतो घटसौरभादयः किन्नु भासंते तत्रापि घटत्वादिसा
मान्यलक्षणसहकारिणा घटत्वादिना घटाद्युपनीतभानसामग्र्याः सत्त्वा
त् न च यावद्घटादिप्रत्यक्षस्य सामान्यज्ञानजन्यतावच्छेदकतया न तत्तस्मा
द्वच्छिन्नस्यापादानं संभवति घटत्वादिप्रकारकप्रत्यक्षत्वरूपतज्जन्यतावच्छे
दकावच्छिन्नं तु ज्ञायत एवेति वाच्यं घटत्वेन यत्किंचिद्विषयकलौकिकप्रत्यास
त्तिदशायां यावंतो यदा भासंते न तु घटो नास्तीत्यादावित्यत्र नियामकस्याव

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सा॰
२२ शंपवक्तव्यत्वात् घटत्वत्वविषयतासंबंधेनप्रत्यक्षत्वावच्छिन्नंप्रतिस्वविषयघट
त्ववत्वरूपविषयनिष्ठप्रत्यासत्त्यासामान्यलक्षणायाहेतुत्वकल्पेयावद्घटेषुता
83 दृशप्रत्यासत्त्याघटत्वज्ञानसत्वात् विषयतयाप्रत्यक्षोत्पत्तौबाधकाभावेनापत्तौ
यावद्घटविषयकप्रत्यक्षापत्तेर्दुर्वारत्वात् यत्तुघटत्वप्रकारतानिरूपितलौ
किकविषयताघटत्वज्ञानजन्यतावच्छेदककोटौनिवेश्यते ए
वंचतत्तद्धर्मावच्छिन्नयत्किंचिद्व्यक्तिनिष्ठकार्यतानिरूपितात्किंकि राम २२

23A निरूपितकारणतावच्छेदकायावंतोधर्माः प्रत्येकंतदवच्छिन्नस्तोमात्मका
त्तदवच्छिन्नमेवधायकसामग्र्यालौकिकसन्निकर्षं इतितायाउपदर्शित
स्थलेऽभावाव्याप्तिः घटोनास्तीत्यादौज्ञातघटादिज्ञानंचक्षुर्ज्ञानत्वत
णानत्वेवेति तदसत् घटत्वादिप्रकारतानिरूपितलौकिकविषयताज
न्यतावच्छेदककोटौनिवेशेनसामान्यलक्षणाजन्यघटादिमानससंग्र
हादिति नैवम् घटत्वादिप्रकारतानिरूपितमुख्यविशेष्यताशालिप्रत्य

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सा॰
२५
24

स्तत्वमेव घटत्वादिसामान्यलक्षणाजन्यतावच्छेदकं तदवच्छिन्नं च फलं द्विवि
धमेव घटत्वादिप्रकारतानिरूपितलौकिकविषयताशालिबहिरिंद्रियज
न्यप्रत्यक्षं घटक्त्वाकारकं प्रमात्मकं च तथा च सामग्री व्याप्तौ यत्किंचिदित्यने
न प्रथमस्योपादाने तद्विशिष्टकार्यतानिरूपितकारणतावच्छेदकावच्छिन्ना
स्तोमात्मकसामग्र्यालौकिकसन्निकर्षादिघटिततया तदभावादेव घटो ना
स्तीत्याकारकचाक्षुषादिपूर्ववृत्तेणोऽभावः ॥ अंत्यस्योपादाने च तद्विशिष्टकार्य

साम
२५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

२५A तानिरूपितकारणतावच्छेदकावच्छिन्नस्तोमात्मिकायाः सामग्र्याः चाक्षुषा
दिसामग्र्यभावघटिततया तदभावादेवोपदर्शितस्थलेऽप्रसक्तमित्यापादकविर
हादापत्तिविरहः। अथ सामान्यघटितसामग्रीव्याप्तौ घटत्वादिप्रकारकलौ।
किकप्रत्यक्षसामग्र्यास्तादृशसामग्रीत्वेन घटत्वचक्षुःसंयोगत्वादिनावान।
निवेशः संभवति तादृशधर्माणां कारणतानवच्छेदकत्वात् कारणतानवच्छे
दकधर्मावच्छिन्नस्य सामग्रीव्याप्तिमध्ये निवेशानातिप्रसंगवारणे सर्वेम

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सा॰ २५ 25

तत्सिद्धबहुतरकार्यकारणाभावविलयप्रसंगात् तथाचालोकसंयोगा
वच्छिन्नचक्षुःसंयोगादिनैवलौकिकप्रत्यक्षत्वादिहेतवः सामग्रीव्याप्तौ निवेश
नीयाः तथाच तादृशचक्षुःसंयोगादिसमवहितघटत्वादिज्ञाने यदा यत्र का
रणतावच्छेदकप्रत्यासत्त्यात्तद्व्यवहितोत्तरक्षणे तत्र कार्यमित्येतादृशसाम
ग्रीव्याप्तिरूपं तथा चक्षुःसंयोगादिसमवहितत्वं च एकक्षणवृत्तित्वसंबंधे
न तद्विशिष्टत्वरूपं ग्राह्यं न त्वेकदेशवृत्तित्वसंबंधेन तद्विशिष्टत्वरूपं कार

साम २५

२५A

णतावच्छेदकप्रत्यासत्यातेषामेकदेशवृत्तित्वासंभवात् स्वविषयीभूता
सामान्याश्रयत्वप्रत्यासत्त्यासामान्यज्ञानहेतुतामतेतादृशासंबंधेनघटत्व
ज्ञानादीनांघटचक्षुःसंयोगादिसमानदेशतासंभवेपिपटादिचक्षुःसं
योगसमवहितेनापिघटत्वादिज्ञानेनपटादौघटत्वादिभ्रमजनकदोषा
दिसमवधानदशायांयावद्बहुत्वादिचाक्षुषजननेनैकदेशवृत्तित्वसंभवा
त् एवंचदोषादिशून्यकालेपिघटादिचक्षुःसंयोगमात्रसत्वेघटत्वादिज्ञा

निवेशाय

सा॰
२६

26

नकार्यतावच्छेदकावच्छेदकावच्छिन्नापत्तिः चक्षुःसंयोगादिकालवृत्तित्ववि
शिष्टसामान्यज्ञानसत्वात् विनैवदोषंघटचक्षुःसंयोगादिदशायांमहत्व
ज्ञादोषनिवेशासंभवादितिचेत् तर्हि वाधाभावादिघटितसामग्रीव्याप्तौका
गतिः तत्रापिघटाभावादिप्रकारकत्वाद्युपनिर्णयाभावादिघटितसामग्री
व्याप्तौसन्निकर्षादीनांघटचक्षुःसंयोगादिनानिवेशासंभवात् चक्षुःसंयो
गत्वादिनैवतेषांनिवेशानीयतयापटादिचक्षुस्संयोगादिकं न स्या

राम
२६

26A ज्ञजन्यतावच्छेदकीभूतघटादिप्रकारकचाक्षुषाद्यवच्छिन्नापत्तिः अथ
तत्तद्घटादिवृत्तिविषयतासंबंधेन ज्ञानत्वावच्छिन्नं प्रति तादृशसंबंधेन स्वरसा
धारणज्ञानत्वेन हेतुता कल्प्यते तथा च घटवृत्तिविषयतादिरूपसमवायादि
रूपकारणतावच्छेदकप्रत्यासत्तिघटितसामानाधिकरण्यसंबंधेन तादृशज्ञा
नविशिष्टचक्षुःसंयोगाद्यात्मकविषयवृत्तिसामग्रीसमवहितघटाभाववच्चाक्षु
षाद्यभावस्यैव घटचाक्षुषत्वादिरूपकार्यतावच्छेदकावच्छिन्नव्याप्यत्वमभ्यु

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सा॰ २७ षयते घटचक्षुःसंयोगादीनां च घटवृत्तिविषयतासंबंधेन ज्ञानाधि-
करणेऽवृत्तेर्न तत्समवहितबाधाभावादिवलात् घटचाक्षुषाद्यापत्ति-
27 रिति चेत् तुल्यं प्रकृतेपि न च घटचक्षुःसंयोगदशायामपि पटे घट-
त्वभ्रमजनकदोषादिसत्वे घटत्वसामान्यलक्षणाजन्यचाक्षुषोदयात् घ-
टादिवृत्तिविषयतासमवायघटितसामानाधिकरण्यसंबंधेन ज्ञानविशि-
ष्टचक्षुःसंयोगाद्यात्मकसामग्रीसमवहितघटत्वज्ञानस्यापि फलव्याप्यत्वं राम २७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

27A

स्वीक्रियतां नन्वाचदोषादिमहन्यकालेपि घटादिमात्रवृत्तिसंयोगसत्वे
घटत्वसामान्यलक्षणाजन्यज्ञानापत्तिर्दुर्वारैवेत्याशंकनीयं तादृश
स्य तद्दोषस्याभिनिवेशनात् नन्वेवं घटत्वात्मकैकसामान्यलक्षणाप्रत्या
सत्तिघटितसामग्रीव्याप्तेरेव घटपटादिभेदेनानंत्यापत्तिरेवमितिवाच्यम्
गत्यंतराभावेन तादृशगौरवस्याकिंचित्करत्वात् परे तु घटत्वादिप्रकार
तानिरूपितमुख्यविशेष्यतात्मकाशाविमानसत्सामान्यप्रत्यासत्ते प्रवि

सा॰ २८
४४

स्ववृत्तिप्रतियोगिकत्वसंबंधेनकृतिविशिष्टघटत्वप्रकारतानिरूपितलौ
किकविषयताशालिप्रत्यक्षप्रागभावत्वेनात्मनिष्ठप्रत्यासत्त्याहेतुत्वेकल्प्य
ते नादृशसंबंधेनचकृतिविशिष्टासत्प्रागभावप्रतियोग्यव्यवहितप्राक्
क्षणएववर्त्ततेअतोनास्तिप्रसंगः । स्वयंचणकात्मवृत्तित्वसंबंधेनतादृ
शप्रागभावविशिष्टघटत्वस्तानत्वाद्यवच्छेदेनफलनिरूपितैकैकव्याप्ति
रेवाभ्युपेयते घटोनास्तीत्यादिप्रत्यक्षेव्यभिचारवारणायप्रमत्वविशे

राम
२८